International Journal of Sanskrit Research 2020; 6(3): 66-70

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(3): 66-70
© 2020 IJSR
www.anantaajournal.com
Received: 01-03-2020
Accepted: 03-04-2020

**Dr. Menakarani Sahoo**
Assistant Professor of Sanskrit,
P.G. Department of Sanskrit
Shailabala Women's (Auto)
College, Cuttack, Odisha, India

**Corresponding Author:**
**Dr. Menakarani Sahoo**
Assistant Professor of Sanskrit,
P.G. Department of Sanskrit
Shailabala Women's (Auto)
College, Cuttack, Odisha, India

# पुर्वजन्मसंस्कारस्य फलम् : एकं समीक्षात्मकमध्ययनम्

**Dr. Menakarani Sahoo**

**सारांश**

मनुष्ये पशौ च आहारः, निद्रा, भयं, मैथुन्यञ्च समानं वर्तते परन्तु कर्तव्याकर्तव्यस्य ज्ञानं तयोः मध्ये पार्थक्यं प्रदर्शयति । कर्तव्याकर्तव्यस्य ज्ञानं बुद्धेरनुकरणं करोति । अध्यवसायात्मकं दृढनिश्चयात्मकं ज्ञानं बुद्धिः भवति । सा बुद्धिः द्विविधाः सात्त्विकी तामसी चेति । सात्त्विकी बुद्धिस्तु धर्मज्ञानवैराग्यैश्वर्यभेदेन चतुर्विधा । तामसी बुद्धिः अधर्माज्ञानावैराग्यानैश्वर्यभेदेन चतुर्विधा । तामसी बुद्धिः मनुष्यं कुकर्म प्रति प्रेरयति । येन मनुष्यः अकार्यं करोति । धर्मार्थं कामार्थम् अर्थोपार्जनार्थं मोक्षप्राप्तये च कर्मणः आवश्यकता अनुभूयते । 'न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्' इति न्यायेन मानवः सर्वदा कर्मणि लिप्तः भवति । कर्मणः फलं मनुष्यं परत्रमप्यनुगच्छति । अतः मानवः सर्वदा यत्नेन कर्म कुर्यात् । कर्मणः फलं कृतकर्मानुसारं प्राप्तं भवतीति । अस्य प्रमाणं वेदेषु,उपनिषत्सु, पुराणेषु, रामायणे, महाभारते, संस्कृतमहाकाव्येषु, नाटकेषु, गद्यकाव्येषु, गीतिकाव्येषु च उपलभ्यते ।

**कूटशब्दः** वासांसि, जननान्तरसौहृदानि, गर्भदासः, योषित्प्रकृतिः, संस्कारः

## प्रस्तावना

भारतीयमनोविज्ञानदृष्ट्या मृत्युः जीवनस्य द्योतकः भवति । परन्तु पाश्चात्य मनोविज्ञानदृष्ट्या मृत्युः जीवनस्यान्तमिति कथ्यते । भारतीयमनोविज्ञाने पुनर्जन्मनि विश्वासः वर्तते । यदा वस्त्रं मलिनं भवति तदा मनुष्यः तत् त्यक्त्वा नववस्त्रं धारयति। मनुष्यः इव आत्मा अपि जीर्णशरीरं त्यक्त्वा अन्यस्मिन् शरीरे प्रविशति । आत्मनः एतादृशं सत्यं श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन प्रतिपादितम्—

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ।।[1]

एवञ्चोक्तमस्ति-

न जायते म्रियते वा कदाचित्
नायं भुत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ।।[2]

मनुष्यस्य मृत्योरनन्तरं पुनरागमनं शोभनं भवेदिति मनुष्यः सर्वदा वाञ्छति । अतः ऋग्वेदे प्रोक्तम् –

"मधुमन्मे परायणं मधुमत् पुनरायनम् ।"[3]

महाभारतस्य शान्तिपर्वणि वर्णितमस्ति यत् मृत्योरनन्तरं आत्मा एकस्य मनुष्यस्य शरीरात् अन्यशरीरं प्रति गच्छति। यथा-

यथा हि पुरुषः शालां पुनः संप्रविशेन्नवाम् ।
एवं जीवः शरीराणि तानि तानि प्रपद्यते ।। [4]

तत्राप्युक्तमस्ति –

देहान् पुराणानुत्सृज्य नवान् संप्रतिपद्यते ।
एवं मृत्युमुखं प्राहुर्ये जना तत्त्वदर्शिनः ।।[5]

अपिच "जातस्य हि ध्रुवं मृत्युर्ध्रुवं जन्म मृतस्य च''[6] इत्युक्त्वा भगवता श्रीकृष्णेन प्रमाणीकृतम् यत् प्राणिनः पुनर्जन्म अवश्यमेव सम्भवति । पूर्वजन्मनः कर्मणः फलमनुसारमेव मनुष्यः परजन्मनि फलं प्राप्नोति । यथा धेनुसहस्रेषु वत्सा स्वस्य मातुः समीपे गच्छति तथैव पुर्वजन्मनः कर्म अपि मनुष्यस्य परजन्मनि तस्यानुधावनं करोति । तत् कर्म सुकर्म भवति चेत् तस्य फलं शोभनं भवति । यदि मनुष्यः कुकर्मणि लिप्तः भवति तर्हि सः कुफलं प्राप्नोति । यतः चाणक्यमहोदयेन सम्यगुपदिष्टम्-

यथा धेनुसहस्रेषु वत्सो गच्छति मातरम् ।
तथा यच्च कृतं कर्म कर्तारमनुगच्छति ।।[7]

'शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ' इति न्यायेन शुभकर्मणा मनुष्यः सुखं लभते । अशुभकर्मणा सः दुःखं लभते ।

पुराकृतानि पुण्यानि मनुष्यान् रक्षन्ति । हिंसकजन्तुभिराकीर्णे महारण्ये, संग्रामे, रिपूणामुपद्रवकारिणाममित्राणां जलाग्निमध्ये, समुद्रे, गिरिशिखरे, सुप्तावस्थायां जाग्रदवस्थायामपि विषमस्थित्यां पूर्वकृतानि सुकृतानि एव सर्वदा रक्षन्ति । अतः भर्तृहरिमहोदयेन प्रोक्तम् –

वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ।।[8]

पूर्वजन्मार्जितं पुण्यं मनुष्यं सर्वदा भाग्यानुकूलं करोति । अतः नीतिशतके उक्तमस्ति –

भीमं वनं भवति तस्य पुरं प्रधानं
सर्वे जनाः सुजनतामुपयान्ति कस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ।।[9]

कालिदासस्य 'भावस्थिराणि जननान्तरसौहृदानि'[10] इति वाक्यं गद्यकारबाणोऽपि स्वीकृतवान् । कादम्बर्यां पूर्वजन्मसंस्कारस्य फलं कीदृशं भवतीति बाणभट्टेन वर्णितम्। महाश्वेता-पुण्डरीकयोः, कादम्बरी-चन्द्रापीडयोः प्रेमजन्मजन्मान्तरनिमित्तम् । अस्य प्रमाणं स्वयं चन्द्रमा स्वीयमुखेन प्रकाशितवान् –

"वत्सा तु महाश्वेता मन्मयूखैसंभवादप्सरसः कुलाल्लब्धजन्मनि गौर्यामुत्पन्ना । तथा चायं भर्ता स्वयं वृतः । अनेन च स्वयंकृतादेवात्मदोषान्मया सह मर्त्यलोके वारद्वयमवश्यमुत्पत्तव्यम् । अन्यथा जन्मनि जन्मन्येषा वीप्सैव न चरितार्था भवति । तद्यावदयं शापदोषादपैति तावदस्यात्मना विरहितस्य शरीरस्य मा विनाशोऽभूदिति मयेदमुत्क्षिप्य समानीतम् । वत्सा च महाश्वेता समाश्वासिता । तदिदमत्र मत्तेजसाप्यायमानमाशापक्षयात्स्थितम् ।[11]

कादम्बर्यां महर्षिः जाबालिः त्रिकालदर्शी आसीत् । अतः सः जन्मान्तरघटनाविशेषं ज्ञातुं समर्थः आसीत् । यतः 'संस्कार साक्षात्करणात्पूर्वजाति ज्ञानम्' इत्यनुसारं संस्कारसाक्षात्करणादेव पूर्वजन्मनः ज्ञानं भवति ।

शुकः स्वपूर्वजन्मकर्मफलं प्राप्नोति इति महर्षिः जाबालिः अवदत् । तद्यथा - 'स्वस्यैवाविनयस्य फलमनेनानुभूयते ' । एतच्छ्रुत्वा आश्रमवासिनः जन्मान्तरघटना इति कामपि वर्तते वा न वा इत्यस्मिन् साग्रहं प्रकाश्य महर्षिं जाबालिमपृच्छन्—

"वेत्ति जन्मान्तराण्यतीतानि । कथयत्यागामिनमप्यर्थम् । ईक्षणगोचरगतानां च प्राणिनामायुषः संख्यामावेदयति । सर्वैव सा

तापसपरिषच्छ्रुत्वा विदिततत्प्रभावा 'कीदृशोऽनेनाविनयः कृतः, किमर्थं वा कृतः, क्व वा कृतः, जन्मान्तरे वा कोऽयमासीत्' इति कौतुहलिन्योऽभवन् । उपनाथितवती च तं भगवन्तम् 'आवेदय, प्रसीद भगवान्, कीदृशस्याविनयस्य फलमनेनानुभूयते । कश्चायमासीज्जन्मान्तरे । विहगजातौ वा कथमस्य संभवः ।[12]

कादम्बर्यां यदा शुकः महर्षेः जाबालेः मुखात् स्वस्य पूर्वजन्मघटनां श्रुतवान् तदा तस्य स्मरणशक्तिः जाग्रता । यथा—

'तद्यः सः कामोपहचेताः स्वयंकृतादेवाविनयाद्दिव्यलोकतः परिभ्रंश्यन्मर्त्यलोके वैशम्पायननामा शुकनाससूनुरभवत् । स एवैष पुनः स्वयंकृतेनाविनयेन कोपितस्य पितुराक्रोशान्महाश्वेताकृताच्च सत्याधिष्ठानादस्यांशुकजातौ पतितः' इत्येवं वदत्येवं भगवति जाबालौ बाल्येऽपि मे सुप्तप्रबुद्धस्येव पूर्वजन्मान्तरोपात्ताः समस्ता एव विद्या जिह्वाग्रेऽभवन् । सकलासु च कलासु कौशलमुपजातम् । उपदेशायमनुजस्यैव चेयं विस्पष्टवर्णाभिधाना भारती च संवृत्ता । विज्ञानं च सर्ववस्तुविषयं स्मरणं च संवृत्तम् ।'[13]

पितरौ केवलं पुत्रेषु स्निह्यतः अपितु तस्य मङ्गलार्थं कठेराचरणमपि कुरुतः इति कादम्बरी स्वपात्रमाध्यमेन उपदिशति । यदा पुण्डरीकः स्वमार्गच्युतः सन् अभिशप्तः संजातः, पुनः परस्मिन् जन्मनि वैशम्पायनः सन् स्वस्य नायिकायाः महाश्वेतयाः अभिशापेन अभिशप्तः तदा पिता श्वेतकेतुः लक्ष्मीम् आदिशति यत् पुण्डरीकः स्वस्य अविमृश्यतायाः फलं प्राप्नुयात् इति । अतः सः लक्ष्म्यै आदेशं दत्तवान् यत् —

"'सर्व एव ह्यविनयप्रवृत्तोऽनुतापाद्विना न निवर्तते । तदयं ते तनयः कदाचिदस्या अपि तिर्यग्जातेरधस्तान्निपतति । तद्यावदिदं कर्म न परिसमाप्यते तावदेनं मर्त्यलोक एव बद्ध्वा धारय। यथा चानुतापोऽस्य भवति तथा प्रतिविधेयमस्य' इति । तदस्य विनयायेदं विनिर्मितं मया ।"[14]

कादम्बर्यां यदा शुकः आर्या छन्दसि राज्ञः शूद्रकस्य प्रशंसां कृतवान् तदा राजा आश्चर्यमनुभूय शुकस्य प्रशंसां कृतवान् तदा प्रधानामात्यः कुमारपालितः स्मितहास्य प्रकट्य उक्तवान्—

"देव! किमत्र विचित्रम् । एते हि शुकशारिका प्रभृतयो विहङ्गविशेषा यथा श्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन । तत्राप्यन्यजन्मोपात्तसंस्कारानुबन्धेन वा पुरुषप्रयत्नेन वा संस्कारातिशय उपजायत इति नातिचित्रम् । अन्यच्च, एतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटाक्षरा वागासीत्, अग्निशापात्त्वस्फुटालापता शुकानामुपजाता करिणाञ्च जिह्वापरिवृत्तिः ।"[15]

अर्थात् शुकशारिका प्रभृतयः वाणीं श्रुत्वा तस्यानुसरणं कृत्वा एव उच्चारयन्ति । अपि च पूर्वजन्मनः संस्कारकारणादपि एतत् अवश्यं भविष्यति अत्र आश्चर्यस्य विषय कोऽपि न भवति । पुनः अभिशापकारणादपि शुकः अस्पष्टवचनं प्रकाशयति इति । अस्मात् स्पष्टं भवति यत् पूर्वजन्मनः संस्कारः पक्षिणामुपरि पतत्येव । पुनः चन्द्रापीडस्य मुखेऽपि जननान्तर विषयमुपस्थापितवान् । यथा— "कथाया अनेकजननवृत्तान्तप्रवाहे शापतपसी नितरामेवौचित्यमादधाते ।"
शूद्रकविरचितमृच्छकटिकप्रकरणस्य अष्टमेऽङ्के यदा शकारः वसन्तसोनायाः हननं कर्तुं विटमादिशति तदा विटः तस्यादेशं अस्वीकारं कृत्वा अवदत् –

येनास्मि गर्भदासो विनिर्मितो भागधेयदोषैः ।
अधिकञ्च न क्रीणिष्यामि तेनाकार्यं परिहरामि ।।[16]

विटस्य वचनात्सपष्टं भवति यत् पुर्वजन्मनः पापस्य कारणादेव मनुष्यस्य जन्म दासकुले भवतीति ।
शिशुपालवधमहाकाव्यस्य रचयिता कविर्माघः अपि पूर्वजन्मसंस्कारे विश्वसिति।। तस्य महाकाव्ये महर्षिः नारदः शिशुपालस्य पुर्वजन्मनः दौरात्म्यं वर्णयित्वा उक्तवान् यत् यथा सती योषित् जन्मान्तरेऽपि स्वीयं स्वामिनं प्राप्नोति

तथैव स्थिरा प्रकृतिरपि जन्मान्तरेषु पुमांसमभ्येति । अतः रावणस्य प्रकृतिः परजन्मनि शिशुपालेन असादिता । तद्यथा-

बलावलेपादधुनापि पूर्ववत् प्रबाध्यते तेन जगज्जिगीषुणा।
सतीव योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि ।। [17]

पुण्यकर्मणः फलं स्वर्गप्राप्तिः। नाट्यकारभासकृतप्रतिमानाटकस्य चतुर्थेऽङ्के राजा दशरथः स्वपुण्यकर्मणा स्वर्गं गतवानिति भरतेन प्रतिपादितम्-

स्वर्गं गते नरपतौ सुकृतानुयात्रे
पौराश्रुपातसलिलेरनुगम्यमानः।
द्रष्टुं प्रयाम्यकृपणेषु तपोवनेषु
रामाभिधानमपरं जगतः शशाङ्कम्।। [18]

कर्मायत्तं फलं मनुष्यः प्राप्नोति । मनुष्यस्य बुद्धिरपि कर्मानुसारिणी भवति । अतः सज्जनाः सुचिन्तित्य एव कर्म कुर्वन्ति । अतः चाणकयेन प्रोक्तम् –

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणि ।
तथापि सुधियश्चाऽऽर्या सुविचार्यैव कुर्वते ।।[19]

अतः सर्वदा सहसा किमपि कार्यं कर्तुं न चिन्तयेत् । कार्यकरणातपुर्वं कर्मणः फलं कीदृशं भवेत् इति तस्मिन् विषये अवश्यमेव विचारविमर्शः करणीयः । अतः महाकविना भारविना प्रोक्तम् –

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।।[20]

## संदर्भ सूची

1. श्रीमद्भगवद्गीता— गीता प्रेस, गोरखपुर, २००१, पृ- ४०
2. श्रीमद्भगवद्गीता— गीता प्रेस, गोरखपुर, २००१, पृ- ३९
3. उपाध्याय, प्रो॰ रामजी : आर्ष सुभाषित साहस्री, भारतीय संस्कृति संस्थानम्, वाराणसी,२००७, पृ. २१
4. उपाध्याय, प्रो॰ रामजी : आर्ष सुभाषित साहस्री, भारतीय संस्कृति संस्थानम्, वाराणसी,२००७, पृ. २०९
5. उपाध्याय, प्रो॰ रामजी : आर्ष सुभाषित साहस्री, भारतीय संस्कृति संस्थानम्, वाराणसी,२००७, पृ. २०९
6. श्रीमद्भगवद्गीता— गीता प्रेस, गोरखपुर, २००१, पृ- ४१
7. चौधुरी, डॉ॰ गुञ्जेश्वर : चाणक्यनीतिदर्पणः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५, पृ-१६७
8. त्रिपाठी, डॉ॰ श्रीकृष्णमणि : भर्तृहरिशतकत्रयम्, चौखम्बा विद्याभवन, वाराणसी,२००८, पृ- ११३
9. त्रिपाठी, डॉ॰ श्रीकृष्णमणि : भर्तृहरिशतकत्रयम्, चौखम्बा विद्याभवन, वाराणसी,२००८, पृ-१९८
10. राय, डॉ॰ गङ्गासागर : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं.२०६५, पृ-२२५
11. शास्त्री, श्री कृष्णमोहन : बाणभट्टकृता कादम्बरी, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. २०५२. पृ-२२३
12. शास्त्री, श्री कृष्णमोहन : बाणभट्टकृता कादम्बरी, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. २०५२. पृ- १०४
13. शास्त्री, श्री कृष्णमोहन : बाणभट्टकृता कादम्बरी, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. २०५२. पृ-६८२
14. शास्त्री, श्री कृष्णमोहन : बाणभट्टकृता कादम्बरी, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. २०५२. पृ-७०७
15. शास्त्री, श्री कृष्णमोहन : बाणभट्टकृता कादम्बरी, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. २०५२. पृ- ७३
16. मिश्रः, जगदीशचन्द्रः : महाकविशूद्रकविरचितं मृच्छकटिकम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, पृ. ३७९
17. शास्त्री, प्रो॰ हरगोविन्द : महाकविश्रीमाघप्रणीतं शिशुपालवधम्, चौखम्बा विद्याभवन, वाराणसी,२०१०, पृ. ५१
18. मालवीय, डॉ॰ सुधाकर : भासनाटकचक्रम् (प्रथमो भागः), चौखम्बा कृष्णदास अकादमी, वाराणसी, २०१०, पृ-१००

19. चौधुरी, डॉ॰ गुञ्जेश्वर : चाणक्यनीतिदर्पणः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५, पृ- १६९
20. मिश्रः, श्रीबदरीनारायण : महाकविभारविप्रणीतं किरातार्जुनीयम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२, पृ. ५१
21. अमरसिंह-प्रणीतः अमरकोषः, संक्षिप्त माहेश्वरी टीका सहित, दशम संस्करण, निर्णय सागर प्रकाशन, मुम्बई, १९६९ ई॰
22. उपाध्याय, प्रो॰ रामजी : आर्ष सुभाषित साहस्री, भारतीय संस्कृति संस्थानम्, वाराणसी,२००७
23. चौधुरी, डॉ॰ गुञ्जेश्वर : चाणक्यनीतिदर्पणः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५
24. त्रिपाठी, डॉ॰ श्रीकृष्णमणि : भर्तृहरिशतकत्रयम्, चौखम्बा विद्याभवन, वाराणसी,२००८
25. मिश्रः, जगदीशचन्द्रः : महाकविशूद्रकविरचितं मृच्छकटिकम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी
26. मिश्रः, श्रीबदरीनारायण : महाकविभारविप्रणीतं किरातार्जुनीयम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१२
27. राय, डॉ॰ गङ्गासागर : महाकविविरचितम् अभिज्ञानशाकुन्तलम्, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं.२०६५
28. शास्त्री, प्रो.हरगोविन्द : महाकविश्रीमाघप्रणीतं शिशुपालवधम्, चौखम्बा विद्याभवन, वाराणसी,२०१०
29. शास्त्री, श्री कृष्णमोहन : बाणभट्टकृता कादम्बरी, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. २०५२
30. श्रीमद्भगवद्गीता— गीता प्रेस, गोरखपुर, २००१